# U.G. 1st Semester Examination - 2023

## SANSKRIT

## [MAJOR]

## Course Code : SANS-MJ-T-01

## [NEP-2020]

Full Marks : 60 Time : $2\frac{1}{2}$ Hours

*The figures in the right-hand margin indicate marks. Candidates are required to give their answers in their own words as far as practicable.*

1. निम्नलिखितेषु प्रश्नेषु यथेच्छं **दशानां** प्रश्नानामुत्तरं सरलसुरगिरा देवनागरीलिपिञ्चांश्रित्य प्रदेयम्: 2×10=20

Answer any **ten** of the following questions in Sanskrit language with Devanāgarī scripts :

क) 'रघुवंशम्'-महाकाव्ये कति सर्गाः समुपलभ्यन्ते? अस्य महाकाव्यस्य प्रथमसर्गस्य नाम किम्?

ख) "आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव" - महीक्षिताम् आद्यः क आसीत्? तदन्वये कः खलु राजेन्दुः प्रसूतः?

ग) राज्ञः दिलीपस्य पत्नी का आसीत्? वसुधाधिपो दिलीपो जगतो गुरूभारं किमर्थं सचिवेषु निक्षिप्तवान्?

घ) कस्मात् कारणाद् सुरभिः दिलीपं शशाप? सः शापः दिलीपेन किमर्थं न श्रुतः?

ङ) "सुप्तमीन इव ह्रदः" - कः कदा सुप्तमीनः ह्रद इव तस्थौ?

च) "स ददर्श तपोनिधिम्"- 'तपोनिधिः'-इत्यनेन को बोध्यः? सायन्तनस्य विधेः अन्ते सः कया सह अन्वासित आसीत्?

छ) कस्य वचः नारिकेलफलसम्मितं कल्पितः? किरातार्जुनीयमहाकाव्यस्य प्रसिद्धटीकाकारद्वयस्य नाम लिख्यताम्।

ज) ''न विव्यथे तस्य मनः''- कस्य मनः किमर्थं न विव्यथे?

झ) ''कृतारिषड्वर्गजयेन...'' 'अरिषड्वर्ग'-पदस्य कोऽर्थः? दुर्योधनःकथम् अरिषड्वर्गजयेन पौरुषं वितनोति?

ञ) युधिष्ठिरं प्रति द्रौपद्याः क्रोधोद्दीपकोक्तिमध्ये अर्जुनस्य का दुरवस्था प्रकटिता?

ट) ''निराश्रया हन्त हता मनस्विता''-कस्य उक्तिरस्ति? तात्पर्यं विश्लेषणीयम्।

ठ) किरातार्जुनीयस्य रचनाकारः कः? अस्मिन् महाकाव्ये मुख्यरसः कोऽस्ति?

ड) रावणवधमहाकाव्यस्य रचयिता कः? अस्य नायकः कः?

ढ) प्राचीनसंस्कृतसाहित्यें 'नैषधचरितम्' कस्य कृतिरस्ति? अस्य महाकाव्यस्य उत्सः कः?

ण) 'शिशुपालबधम्' इति महाकाव्यस्य नायकः कः? प्रतिनायको वा कोऽस्ति?

2. निम्नलिखितेषु प्रश्नेषु यथेच्छं **चतुर्णां** प्रश्नानामुत्तरं संस्कृतभाषया वङ्गभाषया आङ्गलभाषया वा प्रदेयम्: 5×4=20

Answer any **four** of the following questions either in Sanskrit or Bengali or English language :

क) यस्य कस्यचि**देकस्य** श्लोकस्य बङ्गानुवादःक्रियताम्-

Translate into Bengali in any **one** of the following verse :

(i) ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।
गुणा गुणानुवन्धित्वात्तस्य सप्रसवा इव।।

(ii) अबन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः।।



ख) अधःस्थितयोः श्लोकांशपादयोः यथामति भावं विस्तारयतु - **(एकस्य)** :

Amplify the meaning of the part of the verse on any **one** of the following :

(i) प्रतिवध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः।।

(ii) हितं मनोहारी च दुर्लभं व्रचः।।

ग) रघुवंशमहाकाव्यस्य प्रथमसर्गानुसारं सुदक्षिणया सह राज्ञो दिलीपस्य वशिष्ठाश्रमयात्रायाः शोभा वर्ण्यताम्।

Describe the beauty of the journey of King दिलीप with सुदक्षिणा to वशिष्ठाश्रम according to the first canto of the Epic रघुवंशम् ( *Raghuvaṃs'am* ).

घ) संक्षिप्तात्मिकां टीकां रचयतु - **(द्वयस्य)** :

Write short notes on any **two** of the following :

(i) द्वैतवनम्

(ii) नन्दिनी

(iii) वृकोदरः

(iv) दण्डनीतिः

ङ) संक्षिप्तात्मिकां टीकां रचयतु - **(एकस्य)** :

Write short note on any **one** of the following :

i) बुद्धचरितम्, ii) कुमारसम्भवम्

च) प्राचीनसंस्कृतसाहित्ये श्रीहर्षस्य अवदानं संक्षेपेणालोचयतु।

Discuss in brief the contribution of श्रीहर्ष in the field of Ancient Sanskrit literature.

3. निम्नलिखितेषु प्रश्नेषु यथेच्छं **द्वयोः** प्रश्नयोरुत्तरं संस्कृतभाषया वङ्गभाषया आङ्गलभाषया वा प्रदेयम्: 10×2=20

Answer any **two** of the following questions either in Sanskrit or Bengali or English language :

क) यस्य कस्यचि**देकस्य** श्लोकस्य उत्सस्थलनिर्देशपुरःसरं सप्रसङ्गव्याख्या कार्या : (संस्कृतभाषया)

Explain with source and context any **one** of the following verse in Sanskrit :-

(i) क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्।।

(ii) व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः।
प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान् निशिता इवेषवः।।

ख) रघुवंशमिति महाकाव्यस्य प्रथमसर्गानुसारेण नृपतेः दिलीपस्य चारित्रिकमाहात्म्यमालोचयतु।

Discuss the characteristic greatness of King दिलीप according to the first canto of the Epic रघुवंशम् (*Raghuvaṃs'am*).

ग) "स सौष्टवौदार्यविशेषशालिनीं विनिश्चितार्थामितिवाचमादे।।"- 'स'- पदेन को बोद्धः? युधिष्ठिरं निकषा स यत् विशेषशालिनीं वाचमुवाच किरातुर्जुनीयस्य प्रथमसर्गानुसारतः तदालोच्यताम्।

"स सौष्टवौदार्यविशेषशालिनीं विनिश्चितार्थामितिवाचमाददे।।"-

Who is meant by the term 'स'? Write down the meaningful words that he said to युधिष्ठिरः according to the first canto of किरातार्जुनीयम् (*kirātārjunīyam*).

घ) प्राचीनसंस्कृतमहाकाव्यस्य इतिहासे भारविः साहित्यकीर्तिः पर्यालोच्यताम्।

Discuss literary achievement of भारविः in the history of Ancient Sanskrit Epics.

---